Roll No.
रोल नं.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

**Code No. 035**

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।

# SANSKRIT COURSE - (B)
# संस्कृत कोर्स - (ब)

***General Instructions :***

***सामान्य निर्देश :***

***Read the following instructions very carefully and strictly follow them.***

***निम्नलिखित निर्देशों को ध्यान से पढ़ें एवं पूर्णरूप से उनका अनुपालन करें।***

*Time allowed : 3 hours* — *Maximum marks : 80*

*निर्धारित समय : होरात्रयम्* — *अधिकतमाङ्काः : 80*

***Note / नोट :***

(i) *Please check that this question paper contains* ***12*** *printed pages.*
*कृपया जाँच कर लें कि इस प्रश्न-पत्र में* ***12*** *मुद्रित पृष्ठ हैं।*

(ii) *Please check that this question paper contains* ***18*** *questions.*
*कृपया जाँच कर लें कि इस प्रश्न-पत्र में* ***18*** *प्रश्न हैं।*

(iii) *This question paper comprises four sections -* ***Section - A***, ***Section - B***, ***Section - C*** *and* ***Section - D***. *All question are compulsory.*
*यह प्रश्न-पत्र चार खण्डों में विभाजित किया गया है -* ***खण्ड - क***, ***खण्ड - ख***, ***खण्ड - ग***, *एवं* ***खण्ड - घ***, *सभी प्रश्न अनिवार्य हैं।*

(iv) *In* ***Section - 'A' :*** *there is only one question which carries* ***10*** *marks.*
***खण्ड - 'क'*** *में केवल एक प्रश्न है, जिसके लिए* ***10*** *अंक निर्धारित हैं।*

(v) *In* ***Section - 'B' :*** *total questions are three i.e., Q. no.* ***2*** *to Q.no.* ***4***, *carrying* ***5*** *marks each.*
***खण्ड - 'ख'*** *में प्रश्न संख्या* ***2*** *से प्रश्न संख्या* ***4*** *तक तीन प्रश्न हैं। प्रत्येक प्रश्न के लिए* ***5*** *अंक निर्धारित हैं।*

(vi) *In* ***Section - 'C' :*** *total questions are seven i.e., Q. no.* ***5*** *to Q.no.* ***11***.
*Q. No.* ***5*** *to Q. No.* ***7*** *carry* ***4*** *marks each;*

*Q. No. **8** carry **3** marks;*
*Q. No. **9** carry **4** marks;*
*Q. No. **10** and Q. No. **11** carry **3** marks each.*
***खण्ड** – **'ग'** में प्रश्न संख्या 5 से प्रश्न संख्या 11 तक सात प्रश्न हैं।*
*प्रश्न संख्या 5 से प्रश्न संख्या 7 तक प्रत्येक प्रश्न के लिए **4** अंक;*
*प्रश्न संख्या 8 के लिए 3 अंक;*
*प्रश्न संख्या 9 के लिए 4 अंक;*
*प्रश्न संख्या 10 एवं प्रश्न संख्या 11 में प्रत्येक के लिए 3 अंक निर्धारित हैं।*

(vii) *In **Section - 'D'**, total questions are seven i.e., Q. no. **12** to Q.no. **18**.*
*Q. No. **12** to Q. No. **14** carry **5** marks each;*
*Q. No. **15 to** Q. No. **17** carry **4** marks each;*
*Q. No. **18** carry **3** marks;*
***खण्ड** – **'घ'** में प्रश्न संख्या 12 से प्रश्न संख्या 18 तक सात प्रश्न हैं।*
*प्रश्न संख्या 12 से प्रश्न संख्या 14 तक में प्रत्येक के लिए 5 अंक हैं।*
*प्रश्न संख्या 15 से प्रश्न संख्या 17 तक में प्रत्येक के लिए 4 अंक हैं।*
*प्रश्न संख्या 18 के लिए 3 अंक निर्धारित हैं।*

(viii) *There is no overall choice (except Q. No. **3**) in the question paper. However, an internal choice has been provided in Q. No. **1**, Q. No. **4** to Q. No. **15** and Q. No. **18**. You have to attempt only one of the choice in such questions.*
*प्रश्न–पत्र में समग्र पर (प्रश्न संख्या 3 को छोड़कर) कोई विकल्प नहीं है। तथापि प्रश्न संख्या 1, प्रश्न संख्या 4 से प्रश्न संख्या 15 व प्रश्न संख्या 18 में आन्तरिक विकल्प दिए हुए हैं। ऐसे प्रश्नों में केवल एक ही विकल्प का उत्तर लिखिए।*

(ix) *In addition to this, separate instructions are given with each section and question, wherever necessary.*
*इसके अतिरिक्त, आवश्यकतानुसार, प्रत्येक खण्ड और प्रश्न के साथ भी यथोचित निर्देश दिए गए हैं।*

## खण्डः – 'क' Section - 'A'

**अपठित – अवबोधनम्** **10 अङ्काः**

**1.** अधोलिखितं गद्यांशं पठित्वा यथानिर्देशम् उत्तरत –

पुरा अस्माकं देशे बहवः प्रसिद्धाः राजानः अभवन्। तेषु दुष्यन्तः नाम एकः नृपः आसीत्। तस्य भार्या शकुन्तला आश्रमे पुत्रम् अजनयत्। तस्य नाम भरतः आसीत्। भरतः शैशवावस्थायाम् आश्रमे सिंहशावकैः सह क्रीडति स्म। एकदा सः एकस्य सिंहशावकस्य मुखम् उदघाटयत् अवदत् च – 'जृम्भस्व सिंह! दन्तान् ते गणयिष्यामि।' सिंहशावकः अपि जानाति स्म यत् भरतः अपि मया सदृशः शिशुः अस्ति, मया सह च क्रीडति। अतः सः भरताय न अक्रुध्यत् न च आक्राम्यत्। तत्र तापसीभ्यां निषिद्धः अपि भरतः कथयति स्म – नाहं सिंहाद् बिभेमि। एवम् आसीत् सः निर्भयः बालः भरतः। भरतस्य अभिधानेन एव अस्माकं देशस्य नाम 'भारतम्' अभवत्।

**प्रश्नाः –**

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(क) पुरा देशे कीदृशाः राजानः अभवन्?

(ख) भरतः कैः सह क्रीडति स्म?

(ग) दुष्यन्तस्य भार्या का आसीत्?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) **2x2=4**

(क) सिंहशावकः किं जानाति स्म?

(ख) आश्रमे पुत्रं का अजनयत्?

(ग) कस्य अभिधानेन अस्माकं देशस्य नाम 'भारतम्' अभवत्?

(इ) यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) **1x3=3**

(i) 'दुष्यन्तः' कर्तृपदस्य क्रियापदं किम्?

(क) आसीत् (ख) नृपः (ग) अभवन् (घ) एकः

(ii) 'बिभेमि' इति क्रियापदस्य कर्तृपदं किम्?

(क) भरतः (ख) अहम् (ग) अपि (घ) सिंहात्

(iii) 'निर्भयः' इति विशेषणपदस्य विशेष्यपदं किम्?

(क) मया (ख) बालः (ग) शिशुः (घ) एवम्

(iv) 'पत्नी' इति पदस्य पर्यायपदं किम्?

(क) पुरा (ख) तस्य (ग) मया (घ) भार्या

(ई) अस्य गद्यांशस्य कृते उपयुक्तं शीर्षकं लिखत। **1x1=1**

## खण्डः – 'ख' Section - 'B'

15 अङ्काः

### रचनात्मकं कार्यम्

½x10=5

**2.** भवान् आदित्यः दिल्ली नगरे वसति। भवतः मित्रम् अर्णवः गाजियाबाद – नगरे वसति। अर्णवः संस्कृत-भाषण-प्रतियोगितायां प्रथमं स्थानं प्राप्तवान्। तं प्रति लिखिते वर्धापनपत्रे रिक्तस्थानानि मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।

तिमारपुरम्

दिल्ली

दिनाङ्कः.______

प्रियमित्र! __(i)__

नमो नमः।


भवतां पत्रं प्राप्तम्। पत्रं पठित्वा मम मनः __(ii)__ जातम्। भवान् संस्कृत-__(iii)__ प्रथमं स्थानं __(iv)__। भवतः संस्कृतानुरागः __(v)__। मत्पक्षतः भवते __(vi)__। ईश्वरः __(vii)__ इतः अपि अधिकं __(viii)__ ददातु। पितृचरणयोः __(ix)__ निवेद्यते।

भवतः प्रियमित्रम्

__(x)__।

| मञ्जूषा |
|---|
| प्रसन्नं, भवते, प्रशंसनीयः, अर्णव!, प्राप्तवान्, साफल्यम्, प्रणामः, आदित्यः, भाषण-प्रतियोगितायां, वर्धापनानि। |

**3.** प्रदत्त-चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत – 1x5=5



| मञ्जूषा |
| --- |
| बालिकाः, शिक्षिका, विद्युत्-फलकम् (स्मार्टबोर्ड), शृण्वन्ति, पाठयति, महापुरुषचित्राणि, आसन्दिकासु, उपविष्टाः, ध्यानेन, अग्निशमनयन्त्रम्, भित्तौ, कक्षाचित्रम्, वातानुकूलनयन्त्रम् |

**अथवा**

निम्नलिखित-विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया स्वतन्त्ररूपेण वा संस्कृतेन पञ्चवाक्यात्मकम् एकम् अनुच्छेदं लिखत –

''मम संस्कृतशिक्षकः''

| मञ्जूषा |
| --- |
| व्यक्तित्वम्, अनुशासनप्रियः, आकर्षकम्, संस्कृतशिक्षकः, श्लोकवाचनं, करोति, मधुरस्वरः, आदर्शः विनोदप्रियः, सौम्यवेशं, परिश्रमी, राष्ट्रियपुरस्कार-विजेता, धारयति। |

**4.** अधोलिखितवाक्यानि संस्कृतभाषया अनुवादं कृत्वा लिखत – (केवलं पञ्च वाक्यानि) **1x5=5**

(i) वैभव गेंद से खेलता है।

Vaibhav plays with ball.

(ii) श्याम तुम्हारा मित्र था।

Shyam was your friend.

(iii) रचना पुस्तक पढ़ती है।

Rachana reads book.

(iv) मैं कल अयोध्या जाऊँगी।

I will go to Ayodhya tomorrow.

(v) नदी के दोनों ओर वृक्ष हैं।

There are trees on both sides of the river.

(vi) उमा नदी में तैरती है।

Uma swims in the river.

(vii) उपवन में फूल खिलते हैं।

The flowers bloom in the garden.

## खण्डः – 'ग' Section - 'C' 25 अङ्काः

### अनुप्रयुक्त – व्याकरणम्

**5.** अधोलिखित-वाक्येषु रेखाङ्कितपदेषु सन्धिं/सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नचतुष्टयम्) **1x4=4**

(i) प्रकृतिरेव शरणं जातम्।

(ii) एकदा सौम्या केनापि आवश्यककार्येण गृहं प्रति चलिता।

(iii) गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्।

(iv) इत्येतद् विदुषां वचः।

(v) पिपासितः+वा म्रियते याचते वा पुरन्दरम्।

(vi) चण्डवातेन मेघरवैः+च सह प्रवर्षःसमजायत।

**6.** अधोलिखित-वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) **1x4=4**

(i) न्यायाधीशः आरक्षिणं दोषभाजनम् अमन्यत।

(क) दोषस्य भाजनम् (ख) दोषेण भाजनम्

(ग) दोषाय भाजनम् (घ) दोषं भाजनम्

(ii) काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

(क) काकः चेष्टः इव (ख) काकस्य चेष्टा

(ग) काकः इव चेष्टा यस्य सः (घ) काकः चेष्टः

(iii) भक्ष्यं समलं धरातलम्।

(क) मलेन सहितम् (ख) मलाय सहितम्

(ग) मलं सहितम् (घ) मलात् सहितम्

(iv) कुशलवौ सभां प्रविशतः।

(क) लवः कुशाः च (ख) कुशौ च लवौ च

(ग) लवाः च कुशाः च (घ) कुशः च लवः च

(v) प्रजायाःसुखे सुखं राज्ञः।

(क) प्रजा सुखे च (ख) प्रजासुखे

(ग) प्रजां सुखे (घ) प्रजासुखम्

(vi) विमूढधीः मधुरं न वदति।

(क) विमूढा धीः (ख) विमूढम् धीः

(ग) विमूढा धीः यस्य सः (घ) विमूढा धियः

7. अधोलिखित-वाक्येषु रेखाङ्कित-पदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम् ) **1x4=4**

(i) अन्योऽपि बुद्धिमान् लोके मुच्यते।

(क) बुद्धि + मतुप् (ख) बुद्धि + टाप्

(ग) बुद्धि + ङीप् (घ) बुद्धि + वतुप्

(ii) पुत्रस्य अभ्यधिका कृपा।

(क) अभ्यधिक + ठक् (ख) अभ्यधिक + टाप्

(ग) अभ्यधिक + तल् (घ) अभ्यधिक + ङीप्

(iii) त्वं मीनान् छलेन अधिगृह्य क्रूर + तल् भक्षयसि।

(क) क्रूरतायै (ख) क्रूरताम्

(ग) क्रूरतया (घ) क्रूरतायाः

(iv) तदेवाहुः महात्मानः सम + त्व इति तथ्यतः।

(क) समतया (ख) समत्वम्

(ग) समता (घ) समताम्

(v) सा तपस्विनी, स्वापत्यम् एवं निर्भर्त्सयति।

(क) तपस्विन् + ठक् (ख) तपस्वि + क्तिन्

(ग) तपस्विन् + टाप् (घ) तपस्विन् + ङीप्

8. वाच्यानुसारं प्रदत्तविकल्पेषु उचितपदैः रिक्तस्थानानि पूरयित्वा पुनः लिखत - (केवलं प्रश्नत्रयम्) **1x3=3**

(i) भो! वासव! पुत्रस्य दैन्यं दृष्ट्वा मया _______ ?

(क) रुद्यते (ख) रुद्यसे

(ग) रुद्ये (घ) रोदिमि

(ii) सः 'दीन': इति जानन्नपि सःकृषकः _______पीडयति।

(क) तम् (ख) तस्मै

(ग) सः (घ) तेन

(iii) किम् एतत् भवता न _______ ?

(क) दृश्ये (ख) दृश्यसे

(ग) दृश्यते (घ) पश्यति

(iv) _______ पुत्राय बाल्ये महत् विद्याधनं यच्छति।

(क) पिता (ख) पित्रा

(ग) पितरम् (घ) पितरः

**9.** कालबोधकशब्दैः अधोलिखित – दिनचर्यां पूरयत – (केवलं प्रश्नचतुष्टयम् ) **1x4=4**

(i) शिशुः प्रातः (5.00) ________ वादने जागर्ति ।

(ii) पश्चात् (5.30) ________ वादने दुग्धं पिबति।

(iii) दुग्ध पानानन्तरं (5.45) ________ वादने उद्यानं गच्छति।

(iv) अनन्तरं (6.15) ________ वादने स्नानं करोति।

(v) पश्चात् (7.00) ________ वादने प्रातराशं खादति।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखित-वाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नत्रयम्) **1x3=3**

(i) ते सभायां ______ वदेयुः।

(ii) यदि त्वं मां मुक्त्वा यासि ________ वेलाप्यवेला स्यात्।

(iii) यूयम् ________ प्रयासं कुरुत।

(iv) मार्गेषु ________ अवकरं न क्षिपेयुः।

| **मञ्जूषा** |
|---|
| इतस्ततः, अपि, उच्चैः, तदा |

**11.** अधोलिखित-वाक्येषु रेखाङ्कित-अशुद्धपदाय विकल्पेभ्यः शुद्धं पदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम् ) **1x3=3**

(i) त्वम् श्वः कुत्र गच्छसि ?

(क) गमिष्यसि (ख) गमिष्यामि (ग) गमिष्यति (घ) गमिष्यावः

(ii) अहम् आम्रफलं खादति।

(क) सः (ख) त्वम् (ग) ते (घ) वयम्

(iii) मोहनः ह्यः स्वग्रामम् अगच्छम्।

(क) अगच्छः (ख) अगच्छाव (ग) अगच्छत् (घ) अगच्छन्

(iv) शुनकः दुर्बलम् अस्ति।

(क) दुर्बलः (ख) दुर्बलाय (ग) दुर्बलेन (घ) दुर्बलात्

## खण्डः – 'घ' Section - 'D' 30 अङ्काः

## पठितावबोधनम्

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **5**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहिताम् एकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तम् अन्वधावत् अगृह्णाच्च, परं विचित्रम् अघटत्। चौर एव उच्चैः क्रोशितुम् आरभत "चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकम् अतिथिमेव च चौरं मत्वा अभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**प्रश्ना :**

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **½x2=1**

(i) कः रात्रौ गृहाभ्यन्तरं प्रविष्टः?

(ii) चौरः उच्चैः किं कर्तुम् आरभत?

(iii) चौरः काम् आदाय पलायितः?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(i) रात्रौ चौरः कुत्र प्रविष्टः?

(ii) वस्तुतः चौरः कः आसीत्?

(iii) रक्षापुरुषः किम् अकरोत्?

(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(i) 'आरक्षी एव चौरः आसीत्' अत्र क्रियापदम् किम्?

(ii) 'विचित्रा दैवगतिः' अत्र विशेषणपदं किम्?

(iii) 'दिने' इति पदस्य गद्यांशे विलोमपदं किम् प्रयुक्तम्?

**13.** अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत – **5**

मृगाः मृगैः सङ्गमनुव्रजन्ति,
गावश्च गोभिः तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,
समानशील–व्यसनेषु सख्यम्।।

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **½x2=1**

(i) के मृगैः सह अनुव्रजन्ति?

(ii) सुधीभिः सह के गच्छन्ति?

(iii) समानशीलव्यसनेषु किं भवति?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम् ) **1x2=2**

(i) के तुरङ्गैः सह अनुव्रजन्ति ?

(ii) के गोभिः सह गच्छन्ति ?

(iii) मूर्खाः कैः सह गच्छन्ति ?

(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम् ) **1x2=2**

(i) 'बुद्धिमन्तः' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(ii) 'अश्वाः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(iii) ''मृगाः मृगैः सङ्गम् अनुव्रजन्ति'' अत्र वाक्ये क्रियापदं किम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **5**

काकः – रे परभृत ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।

गजः – समीपतः एवागच्छन् अरे अरे ! सर्वां वार्तां शृण्वन्नेव अहम् अत्र आगच्छम् । अहं विशालकायः बलशाली पराक्रमी च । सिंहः वा स्याद् अथवा अन्यः कोऽपि, वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि । किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी ? अतः अहमेव योग्यः वनराजपदाय ।

वानरः – अरे अरे ! एवं वा ।

(शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति ।)

सिंहः – भोः गज ! मामपि एवमेव अतुदन् एते वानराः ।

वानरः – एतस्मादेव तु कथयामि यदहमेव योग्यः वनराजपदाय येन विशालकायं पराक्रमिणं भयंकरं चापि सिंहं गजं वा पराजेतुं समर्था अस्माकं जातिः ।

**प्रश्नाः :**

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् ) **½x2=1**

(i) काकः कीदृशः पक्षिसम्राट् ?

(ii) सिंहं गजं वा पराजेतुं अस्माकं का समर्था ?

(iii) गजः केन पोथयित्वा तुदन्तं जन्तुं मारयिष्यति ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम् ) **1x2=2**

(i) काकः परभृतं प्रति किं कथयति ?

(ii) गजः कीदृशः अस्ति ?

(iii) वानरः गजस्य पुच्छं विधूय किं करोति ?

(इ) निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम् ) **1x2=2**

(i) 'पालयामि' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'तुदन्तं जन्तुं' इति पदयोः विशेषणपदं किम् ?

(iii) 'दयालुः' इति पदस्य समानार्थकं पदं किम् प्रयुक्तम् ?

**15.** अधोलिखितानि रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम् ) **1x4=4**

(i) चातकः वने वसति।

(ii) नरः कदापि परेषाम् अहितं कर्म न कुर्यात् ?

(iii) करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(iv) गजः वन्यपशून् तुदन्तं शुण्डेन मारयिष्यति।

(v) तत्त्वार्थस्य निर्णयः विवेकेन कर्तुं शक्यः।

**16.** मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखितस्य श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत : **1x4=4**

**श्लोकः –**

य इच्छत्यात्मनः श्रेयः, प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म, स परेभ्यः कदापि च।।

अन्वयः – यः __(i)__ श्रेयः प्रभूतानि __(ii)__ च इच्छति। सः __(iii)__ अहितं कर्म कदापि न __(iv)__ ।

| मञ्जूषा |
|---|
| सुखानि, आत्मनः, कुर्यात्, परेभ्यः |

**17.** अधोलिखित–श्लोकस्य भावार्थे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दानां सहायतया पूरयित्वा पुनः लिखत – **1x4=4**

**श्लोकः –**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।।

**भावार्थः**

गुणी जनः __(i)__ जानाति। निर्गुणः जनः गुणं न जानाति। बलवान् मनुष्यः बलं, __(ii)__ परन्तु निर्बलः बलं न जानाति। अपि च __(iii)__ गुणं पिकः जानाति, तथैव वायसः वसन्तस्य गुणं न जानाति। गजः सिंहस्य बलं जानाति परन्तु __(iv)__ सिंहस्य बलं न जानाति।

| मञ्जूषा |
|---|
| जानाति, गुणं, मूषकः, वसन्तस्य |

**18.** अधोलिखित-वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नत्रयम्) **1x3=3**

(i) ललितलतानां माला रमणीया।

(क) शोभनीया (ख) अशोभनीया

(ग) भ्रमणीया (घ) करणीया

(ii) तर्हि मां निजगले बद्ध्वा सत्वरं चल।

(क) मन्दम् (ख) सततम्

(ग) शीघ्रम् (घ) सर्वतः

(iii) अपि च इतस्तावद् वयस्य!

(क) दुष्ट! (ख) वायस!

(ग) शत्रोः! (घ) मित्र!

(iv) कृषकः तं बहुधा पीडयति।

(क) अनेकवारम् (ख) कदापि

(ग) सुधा (घ) वसुधा

-oOo-